न च तत्रासीत् अस्ति पश्चात् न चांशवत् PramāVā. 1. 153; यत्पराधीनप्रकाशमंशवच्च तत्सामान्यांशग्रहे कारणदोषवशाच्च विशेषाग्रहेऽन्यथा प्रकाशते Bhām. 21. 13 (*on* i. 1. 1); **2** name of one of the varieties of Soma करवीरोंऽशवानपि SuśruS. iv. 29. 6; iv. 29. 13.

**अंशवत्** (aṁśa-vat) *adv.* like or as in the case of Aṁśa (part) अथ एकरूपोपग्राहिण्येव वस्तुनि बुद्धिः न द्वयात्मकत्वमंशवदेव BrahmSi. 65. 4.

**अंशवत्त्व** (aṁśavat-tva) *n.* the state of being entitled to have a share न त्वंशवत्त्वं समम् (पितापुत्रयोः) VīraMi.(Vyavahāra.) 447. 13.

**अंशवध** (aṁśa-vadha) *m.* product of numerators रूपाणि छेदगुणान्यंशयुतानि द्वयोर्बहु(? हू)नां वा । प्रत्युत्पन्नो भवति छेदवधेनोधृतां(? द्धृतोंऽ)शवधः BrāhmSphuSi. 12. 3.

**अंशवर्ग** (aṁśa-varga) *m.* a variety of miscellaneous problems on fractions भागाभ्यासोऽतोंशवर्गोऽथ मूलमिश्रं तस्माद्भिन्नदृश्यं दशामूः GaṇiSāSaṁ. 3. 3.

**अंशवाचित्व** (aṁśavāci-tva) *n.* the state of being expressive of a part, partial signification भावनाप्रयोजनत्वमंशवाचित्वे नास्तीति विनापि सकलार्थाभिधानाद्भवन्ति भावार्थाः TantrVā. 356. 18 (*on* ii. 1. 1)

**अंशवाचिन्** (aṁśa-vācin) *adj.* expressive of a part, (in पादोऽस्य विश्वा भूतानि) पादा(? द)शब्दोंऽशवाची VedāntDī. 129. 10 (on ii. 3. 43)

**अंशवादिन्** (aṁśa-vādin) *adj.* one who asserts that the individual soul is a part of the Highest Soul किं तावदित्यादि । अंशवादिनमत्यन्तभेदवादी दूषयति ब्रह्मणोंऽश इति S'rutaPra. ii. 380. 29 (*on* ii. 3. 42)

**अंशविकल्प** (aṁśa-vikalpa) *m.* option regarding the quantum of share अंशविकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्यः Mitā. 160. 3 (*on* 2. 35)

**अंशविकल्पन** (aṁśa-vikalpana) *n.* (in Mus.) variety of *aṁśas* (key-notes) अत ऊर्ध्वं प्रवक्ष्यामि तासां (i. e. जातीनां) अंशविकल्पनम् NāṭyaS'ā. 28.58.

**अंशविकृत** (aṁśa-vikṛta) *adj.* [*f.*-ā] major-note-derivative विकृतसंज्ञा इति विकारे सम्यग्ज्ञानं विशेषतो यासां, तेन षाडवविकृता, ग्रहविकृता, अंशविकृता··· AbhinBhā. iv. 37. 6 (*on* 28. 45.(1))

**अंशविधान** (aṁśa-vidhāna) *n.* **A** enjoining of parts नन्वंशविधानस्यांशिना विनानुपपत्तेरंशिनि कस्मिंश्चिदाक्षेप्तव्ये बुद्धिस्थः पर्वरूपोंऽशिविशेषः CaturCin. iii. (2). 346. 3; **B** laying down of shares (in ancestral property) पितरि दिष्टं गतेऽपि पितृद्वारैवांशविधानाज्जीवति तस्मिन् सुतराम् Subodhi. 52. 27 (*on* 2. 120); BālamBha. ii. 151. 21 (*on* 2. 120)

**अंशविभाग** (aṁśa-vibhāga) *m.* division or distribution into parts, portions, shares or aspects कर्मणश्च प्रवेशद्रव्यादानांशविभागैः प्रतिसमानयेत ArthaS'ā. ii. 154. 4 (4. 8); न चैकस्यामेव प्रतीतावंशविभागेन प्रामाण्यमप्रामाण्यं वा वक्तुं युक्तम् NyāyMañ. ii. 5. 7; अंशविभागमेवाह AbhinBhā. i. 31. 12 (*on* 1. 83); त्रयोऽश्वास्त्रयः पुत्रास्तदा अंशविभागस्य पर्याप्तत्वात् तद्विभाज्याः Subodhi. 52. 3 (*on* 2. 118); कृष्णेहि···इत्यादौ वाक्ये अंशविभागाभावात्···वाक्यस्यैव विशिष्टार्थे शक्तिः BhaṭṭCin. i. 61. 19 (*on* i. 1. 4); BālamBha. ii. 148. 9 (*on* 2. 118-119); ii. 178. 5 (*on* 2. 132)

**अंशविवर्जित** (aṁśa-vivarjita) *adj.* bereft of any partial aspects प्रत्यक्षेण गृहीतेऽपि विशेषेंऽशविवर्जिते । यद्विशेषावसायोऽस्ति प्रत्ययः स प्रतीयते PramāVā. 1. 59.

**अंशविशेष** (aṁśa-viśeṣa) *m.* a particular aspect or part अत्यन्तासत एव अंशविशेषस्यारोपणीयभात्रे प्रद्वेषमात्रनिबन्धनोऽयमसत्ख्यात्यनङ्गीकारः NyāyMa. 104. 4; भोक्तृभोग्यनियन्तारश्च व्यवस्थिताः ब्रह्मणोंऽशविशेषाः NītiMā. 31. 15; यद्यंशविशेषासाधारणाकारः प्रवृत्तिनिमित्तम् S'rutaPra. i B. 73. 16 (*on* i. 1. 1); ii. 215. 17 (*on* ii. 1. 3)

**अंशविषय** (aṁśa-viṣaya) *adj.* having reference to parts न ह्यंशविषयः संयोगो द्रव्याणां निरंशस्याप्याकाशस्य तद्भावात् NyāyKa. 43. 22.

**अंशविस्तार** (aṁśa-vistāra) *m.* extension of the partial aspect तस्या (i. e. राधिकायाः) एवांशविस्ताराः सर्वाः श्रीकृष्णनायिकाः SkandP. ii. (6). 2. 12.

**अंशवृत्ति** (aṁśa-vṛtti) *f.* existence in a part or parts तस्मादन्यत्र वृत्तिर्न च सकलमतिः क्वापि कृत्स्नांशवृत्त्योः TattvMu. 5. 114; अनुमानस्याप्याद्यस्य सिद्धसाधनता । अंशवृत्तेरेव घटवृत्तित्वात् NyāySu.(Ja.) 365B. 9 (*on* ii. 2. 6)

**अंशवृत्तिता** (aṁśavṛtti-tā) *f.* the state of existing in a part न चांशवृत्तितायां प्रत्यक्षतापातः PrakaVi. 499. 19.

**अंशवृत्तित्व** (aṁśavṛtti-tva) *n.* the state of existing in a part or parts निरवयवत्वे द्वयोरपि संयोगो न संभवति संयोगस्यांशवृत्तित्वात् NyāySu.(Ja.) 350A. 5 (*on* ii. 2. 6); 367A. 7 (*on* ii. 2. 6)

**अंशवृद्धि** (aṁśa-vṛddhi) *f.* increment or addition by one portion अंशवृद्धया समायोज्य चूतपक्काम्बु शक्तितः । ĪśānS'iPa. ii. 33. 63.

**अंशवैषम्य** (aṁśa-vaiṣamya) *n.* difference in the parts पाते भेदात्पलादिप्रतिनियतिरपि ह्यंशवैषम्यतः स्यात् TattvMu. 5. 36.

**अंशव्यतिरेक** (aṁśa-vyatireka) *m.* distinction or difference in parts or aspects अस्त्येव जीवस्य बहुत्वरूपत्वम् । अणुत्वेऽप्यंशव्यतिरेकेण बहुत्वोपपत्तेः TattvPrakā. 118A. 5 (*on* ii. 3. 27)

**अंशव्याप्ति** (aṁśa-vyāpti) *f.* **A** pervasion of parts तदपि च निरंशमभ्युपगन्तव्यम् । अंशव्याप्तेर्युक्तिरिक्तत्वात् SyādvāMañ. 28. 98; **B** partial pervasion or duration अत्र पूर्वेद्युरेव व्याप्तिः··· अंशव्याप्तिः··· इति षट् पक्षाः NirṇaSi. 15. 2.

**अंशव्यावर्तक** (aṁśa-vyāvartaka) *adj.* that which excludes parts or aspects निर्गुणो मम शब्दोऽयमंशव्यावर्तको मतः BṛBrahmS. ii. 2. 52.

**अंशशत** (aṁśa-śata) *n.* hundred degrees युक्तायनांशोंऽशशतं शशी चेदशीतिरर्कौ द्विशती विपातः Golā. 31. 54 (278. 1)

**अंशशब्द** (aṁśa-śabda) *m.* the word *aṁśa* अंशशब्दोऽर्धशब्देन समानार्थोऽर्धशब्दश्च नावश्यं समप्रविभाग एव ManuBh. ii. 171. 12 (*on* 8. 210); अंशशब्दो हि भागवचनो न दायवचनः SmṛtiCan. iii. 623. 16; समुदायैकदेशत्वमेवांशशब्दनिमित्तम् S'rutaPra ii. 387. 8 (*on* ii. 3. 52); ii. 387. 11 (*on* ii. 3. 52); अंशशब्दो हि महाद्रव्यस्यैकदेशं वदन् पित्रादिभोज्यस्यांशित्वरूपत्वम् CaturCin. III. i. 95. 4; मत्स्यादिष्वभेदनिमित्तकोंऽशशब्दः NyāySu.(Ja.) 453A. 11 (*on* ii. 3. 18); अंशशब्दो हि तदेकदेशार्थः तत्सदृशाद्यर्थश्च NyāySu.(Ja.) 510A. 6 (*on* iii. 2. 10); नाप्यत्यन्तभिन्नत्वं तत्रांशशब्दाप्रयोगात् Nyāyāmṛ. 606B. 3; अंशशब्दः कारणवाची । यथा पटस्यांशोऽवयवस्तन्तुः BrahmSūBh.(Bhā.) 140. 25 (*on* ii. 3. 43); अंशशब्दो वेहत्यो लवपरः SetuBa. 207. 2; अंशशब्दः स्थावरान्यपरः BālamBha. ii. 142. 11 (*on* 2. 117); ii. 197. 25 (*on* 2. 135 and 2. 136); नन्वेकवस्त्वेकदेशवाची ह्यंशशब्दः VedāntTaSā 59. 3.

**अंशशब्दितत्व** (aṁśaśabdita-tva) *n.* the state of being expressed by the word *aṁśa* अंशशब्दितत्वेऽपि परो मत्स्यादिः जीववन्न भवति GoviBh. 166. 10 (*on* ii. 3. 44) 168. 8 (*on* ii. 3. 48)

**अंशशस्** (aṁśa-śas) *adv.* into pieces; into parts गामेतामंशशः कृत्वा (? त्वा) ब्राह्मणेभ्यो वरं ददाति BaudhS'S i. 52. 4.

**अंशशेष** (aṁśa-śeṣa) *m. n.* **A** the remaining portion, remainder नापरस्यांशशेषे तु प्रतिपत्तिः कलेरथ MatsyaP. 144. 29; VāyuP. i. 58. 30; अष्टमेनांशशेषेण चतुर्थेनार्धकेन वा ।···सिद्धमुष्णोदकं वदेत् S'ārṅgaS. ii. 2. 159; **B** the remaining degrees or remainder in the form of degrees ज्ञदिने यदंशशेषं विकलाशेषं कदा तदिन्दुदिने BrāhmSphuSi. 18. 17; 18. 57; 18. 59; 18. 86; लिप्ताग्रोत्पन्नफलं लिप्तागुणकोंऽशशेषं स्यात् ĀryaSi. 18. 34 (231); शेषमंशशेषं तत्षष्टिगुणं हरभक्तं फलं कलाः SiddhāTaVi. App. 48. 7.

**अंशशेषित** (aṁśa-śeṣita) *adj.* remaining to the extent of a part or portion शतं पक्त्वाश्वगन्धाया जलद्रोणेंऽशशेषितम् । विस्राव्य विपचेत्तैलं क्षीरं दत्त्वा चतुर्गुणम् SiddhYo. 22. 114.

**अंशषट्क** (aṁśa-ṣaṭka) *n.* a group of six square units सिद्धिं कुर्यात्तथाराणामंशषट्केण सर्वदा PauṣkS 8. 92; समीपवर्तिशोभस्य कोणं चापथकः पयेत् (? चाप्यथ कल्पयेत्) । पङ्क्तिभ्यामंशषट्को(? के)ण पूर्ववत् PauṣkS. 10. 50.

**अंशसंयोग** (aṁśa-saṁyoga) *m.* **A** conjunction of parts अंशांशिनोरभेदेन त्वंशसंयोग एव हि AnuVyā. 26A. 11 (*on* 2. 2); NyāySu.(Ja.) 365B. 2 (*on* ii. 2. 6); 367A. 10 (*on* ii. 2. 6); **B** connection with parts तत्स्थानपतितानां वैकृतीनां च नांशसंयोगो युक्तः NyāyMāVi. 342. 2 (*on* vi. 5. 5)

**अंशसंवाद** (aṁśa-saṁvāda) *m.* theory of validity of particular aspect in cognition पीतशङ्खादिज्ञानं भ्रान्तमपि प्रत्यक्षमिति अंशसंवादवादिनाम् DharmoPra. 35. 23.

**अंशसंक्षय** (aṁśa-saṅkṣaya) *m.* the end of a part अष्टाविंशतितमे तद्वद् द्वापरस्यांशसंक्षये VāyuP. ii. 36. 96.

**अंशसंख्या** (aṁśa-saṅkhyā) *f.* the number of squares सूत्रसंख्याकृतान्येषां(? कृता ह्येषा) त्वंशसंख्यां निबोध तु PauṣkS. 17. 3.

**अंशसंगति** (aṁśa-saṅgati) *f.* connection with the parts or aspects विधेर्भावनया योगः पूर्वं यद्यंशसंगतेः । पश्चात् संबध्यमानानां ततो न स्याद्विधेयता NyāyRaMā. 157. 21.

**अंशसंधिग** (aṁśasandhi-ga) *adj.* found at the juncture of two *aṁśas* वागीशे नीचसंस्थे च चन्द्रे राश्यंशसंधिगे HorāSā. 5. 13.

**अंशसप्तक** (aṁśa-saptaka) *n.* a group of seven units (कार्यस्तुलोदयस्यान्ते) वेदीबन्धोंऽशसप्तकम् SamarāSū. 57. 182.

**अंशसप्तति** (aṁśa-saptati) *f.* (an angular distance of) seventy degrees षष्टित्रयेण वेदाग्नियमयुतामंशसप्ततिं भुङ्क्ते PañcSi. 18. 3.

**अंशसम** (aṁśa-sama) *adj.* equal in degrees, identical in number